त्रैमासिकी / जून २०२४

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



## रथोत्सवप्रिय धृतशम भगाश्रिय
## भवानीशङ्कर शम्भो

# अनुक्रमणिका

| | |
|---|---|
| गुरूपदेशः | १ |
| निवेदनम् | १ |
| चिन्तनम् | २ |
| सुभाषितम् | ३ |
| रामभद्राचार्यः | ४ |
| परमनिधानम् | ५ |
| पक्षिमित्राः भवाम । | ७ |
| बालरञ्जनी | |
| लीला हनुमतः | ८ |
| वाद्यपरिचयः | १० |
| रुचिरा | ११ |
| तस्मै पाणिनये नमः | १२ |
| हास्यकणिका | १३ |
| एकः अविस्मरणीयः प्रसङ्गः | १४ |
| कैवल्योपनिषत्  केचन श्लोकाः | १५ |
| योगविषये किञ्चित् ... | १६ |
| उत्तराणि | १६ |

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

भवानीशङ्करदेवस्य रथोत्सवः न केवलम् अस्माकं समाजस्य अपि तु सम्पूर्णदेशस्य उद्धाराय भवति । अतः आचन्द्रार्कपर्यन्तम् एषः उत्सवः आचरितव्यः।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

गुरूणाम् आराधना गुरूपासना अस्माकं प्रमुखोपासना । रथोत्सवः गुरूणाम् अनुग्रहस्य कृपायाः च प्रतीकः सुस्पष्टद्योतकः अपि । इदं स्मरति चेत् नवीकृतभक्त्या अस्मिन् सहभागं कर्तुं भवान् प्रोत्साहितः भविष्यति ।

गुरूपदेशानुवादः - सुधा कार्नाड , बेङ्गलूरु

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

**दोलायमानं रथस्थं चित्रापुरमठाराध्यम् ।**

**श्रीभवानीशङ्करं दृष्ट्वा पुनर्जन्मो न विद्यते॥**

गतएप्रिलमासे हनुमान् जयन्तिशुभदिने बहुप्रतीक्ष्यमाणः श्रीचित्रापुररथोत्सवः सुसम्पन्नः।

भक्तिभावैक्यस्य सङ्गमः इति रथोत्सवः। चित्रापुर-रथोत्सवस्य इतिहासः दीर्घः। १८६२ तमे वर्षे परमपूज्य-श्रीकृष्णाश्रमगुरुवर्याः तेषां बालशिष्याणां परमपूज्य-पाण्डुरङ्गाश्रमस्वामिनाम् इच्छां परिपूरयितुं रथोत्सवस्य प्रारम्भं कृतवन्तः।

गुरुवात्सल्यस्य अस्य प्रसादस्य गहनतरः उद्देश्यः आसीत् । शैव-आगम-सिद्धान्तानां पुनरुत्थानं , विधिविधानानां संरक्षणं , सारस्वतसमाज-एकत्रीकरणं तथैव भगवतः भवानीशङ्करस्य तस्य गणानां च वैभवस्य उत्साहेन सङ्कीर्तनम् ।

१९३८ तमे वर्षे अपरिहार्यकारणात् रथोत्सवः स्थगितः जातः तथा तस्मिन् स्थाने प्रत्येकस्मिन् शिशिरमासे साधनासप्ताहस्य आचरणं कर्तुं परमपूज्य-श्रीमद्-आनन्दाश्रम-गुरुवर्याः उपदिष्टवन्तः। तेषां शिष्यः परमपूज्य-श्रीपरिज्ञानाश्रमगुरुवर्याः बाल्यात् एव रथोत्सवस्य पुनरुत्थानं कर्तुम् इच्छन्ति स्म। तेषां महत्प्रयासादनन्तरं १९७३ तमे वर्षे इदं कार्यं सफलीभूय रथोत्सवः पुनः प्रारभत । अस्मिन् रथोत्सवसमये प्रदत्तं स्वामिनः भावपूर्णम् आशीर्वचनम् एव तेषां तीव्रेच्छायाः दृढनिश्चयस्य च प्रत्यक्षप्रमाणम् अस्ति।

चित्रापुररथोत्सवः तु सम्पूर्णचित्रापुरग्रामस्य उत्सवः। उत्सवस्य आरम्भे ग्रामस्थजनाः रथोत्सवस्य उपयोगाय कण्डोले शाकफलभारं वहन्तः मङ्गलवाद्यैः सह मठम् आगत्य श्रद्धया भगवते समर्पयन्ति तथा ते सर्वेषु कार्यक्रमेषु अन्यजनैः सह उत्साहेन भागं गृह्णन्ति।

रथोत्सवस्य प्रथमदिने ध्वजारोहणादनन्तरं नानाविधपुष्पैः अलङ्कृतशिबिकायां विराजितः भवानीशङ्करदेवः प्रतिसायङ्कालं ग्रामं परितः विविधस्थानानि अभ्यागच्छति । ग्रामस्थजनाः भगवतः स्वागतार्थं तोरण-रङ्गावल्यैः स्वगृहं स्वक्षेत्रम् अलङ्कुर्वन्ति । साक्षात् भवानीशङ्करभगवतः अत्यन्तनिकटतः दर्शनेन प्रमुदिताः जनाः श्रद्धया भगवते फलपुष्पाणि समर्प्य आरतीं दर्शयन्ति ।

चित्रापुररथोत्सवः इत्युक्ते प्रसन्नतायाः प्रतीतिः आध्यात्मिकतायाः अनुभूतिः च । प्रतिदिनं प्रचलन्तः सङ्गीतनृत्यनाटकादिकार्यक्रमाः तथा मृगबेटेउत्सव-अवभृतस्नान- शङ्करपार्वतीसंवादादिविधयः विलोकनीयाः प्रेरणादायकाः च । रथोत्सवदिनस्य महिमा तु अवर्णनीया । उज्ज्वल-श्वेत-रक्त-पताकाभिः सुशोभितस्य विकसितकमलसदृशदृश्यमानस्य नानाविधपुष्पफलशाकैः अलङ्कृतस्य रथस्य उपरि भेरीशङ्खनादमन्त्रघोषैः आरूढभवानीशङ्करस्य मनोहारि रूपम् अतिविलोभनीयम् । ततः परम् अस्माकं परमपूज्य-सद्योजातशङ्कराश्रमस्वामिनः रथम् आरुह्य प्रचलत् भवानीशङ्करभगवतः पूजनम् । सर्वम् अलौकिकम् एव ! अनन्तरं ' **हर हर महादेव ! हर हर महादेव !** ' इति उच्चघोषैः यदा शतशः भक्तगणाः श्रीभवानीशङ्करदेवेन गुरुवर्यैः च सुविराजितं रथं कर्षन्ति तदा अनुभूतः असीमहर्षः अविस्मरणीयः एव ।

**ये देवमनुगच्छन्ति गच्छन्तं स्यन्दनेन हि।**

**पदे पदे अश्वमेधस्य फलं तेषां न संशयः॥**

" भव भवानीशङ्कर मे शरणम् " इति सम्प्रार्थ्य वयम् इदं पत्रिकापुष्पं श्रीचरणयोः समर्पयामः।

**सम्पादिका**

## चिन्तनम्

**- सुजाता हळदीपुर , मुम्बई**

अधोनिर्दिष्टं सुभाषितम् अधिकृत्य गीर्वाणप्रतिष्ठया आयोजिते चिन्तने सदस्यैः प्रकटिताः विचाराः सारांशरूपेण अधः दीयन्ते ।

**महासर्पेण परिवेष्टितोऽपि चन्दनतरुः न विषायते।**

एतस्मिन् सुभाषिते सत्पुरुषाणां गुणानां तुलना चन्दनतरुणा सह तथा दुर्जनानां दुर्गुणानां तुलना महासर्पेण सह कृता ।

**चन्दनतरोः गुणवैशिष्ट्यम्-**

चन्दनतरोः काष्ठं सौगन्धिकम् अस्ति । सः सर्वत्र सुगन्धं प्रसारयति । न केवलं सः स्वयं सुगन्धितः सः अन्येभ्यः अपि स्वस्य परिमलं ददाति । यः कोऽपि तस्य सम्पर्के आगच्छति सोऽपि तस्मात् सुरभिं प्राप्नोति।

यद्यपि तक्षकः कुठारेण तस्योपरि प्रहारं करोति तथापि चन्दनतरुः तस्य हानिं कुर्वतः कुठारस्य

मुखं सुगन्धितमेव करोति । सज्जनं प्रति तथा दुर्जनं प्रति अपि तस्य व्यवहारः समानः एव अस्ति। सः केनापि सह पक्षपातं न करोति ।

**सत्पुरुषाणां गुणवैशिष्ट्यम्-**

सत्पुरुषाणां स्वभावस्य तुलना चन्दनतरुणा सह उचिता एव । सत्पुरुषाः अपि तेषां सद्गुणानाम् उपयोगम् अन्येषां हिताय एव कुर्वन्ति । गुणीजनाः तथैव दुर्जनाः अपि सत्पुरुषेभ्यः समानतया लाभान्विताः भवन्ति ।

दुर्जनानां स्वभावस्य तुलना महासर्पेण सह कृता ।

**सर्पस्य गुणाः -**

सर्पः जनेषु भयं जनयति । तस्य संसर्गः हानिकारकः अस्ति। सर्पे विश्वसितुं न शक्यम् । कस्मिन्नपि क्षणे सः प्रहर्तुं शक्यते ।

**दुर्जनानाम् अवगुणाः -**

सर्पः इव दुर्जनाः अपि अविश्वसनीयाः। तेषाम् उपकर्तॄणाम् अपि ते हानिं कुर्वन्ति । ते कृतघ्नाः सन्ति । दुर्जनानां सामर्थ्यम् अन्येषां पीडनाय एव वर्तते ।

**यथा उक्तम् ,**

**" विद्या विवादाय धनं मदाय**

**शक्तिः परेषां परपीडनाय ।**

**खलस्य साधोः विपरीतमेतत्**

**ज्ञानाय दानाय च रक्षणाय ॥"**

यद्यपि गुणाः संसर्गजन्याः तथापि यथा सर्पस्य परिवेष्टनेन चन्दनतरोः मूलस्वभावः परिवर्तितः न भवति तथैव दुष्टानां संसर्गेण साधोः स्वभावपरिवर्तनं न भवति । प्रतिकारसमर्थाः चेदपि सज्जनाः सदैव जनानां परोपकाराय एव स्वजीवनं समर्पयन्ति ।

**सुजनो न याति वैरं**
**परहितबुद्धिर्विनाशकालेऽपि ।**
**छेदेऽपि चन्दनतरुः सुरभयति मुखं**
**कुठारस्य ॥**

## सुभाषितम्

**- सुधा उल्लाल , बेङ्गलूरु**

**अति दर्पे हता लङ्का अति माने च कौरवाः।**
**अति दाने बलिर्बद्धः सर्वमत्यन्तगर्हितम् ॥**


**भावार्थः -**

रावणस्य अति गर्वः लङ्कायाः नाशस्य कारणम् अभवत् । कौरवाणां नाशस्य कारणं तेषाम् अति लोभः। बलि राजा तस्य अति दातृत्वात् नरकगतिं प्राप्य बलिः अभवत् । तात्पर्यम् अधिकमात्रायां किमपि वर्जितव्यम् ।

अस्माकं जीवनेऽपि वयं पश्यामः यत् किमपि अधिकं भवति तत् तु हानिकारकमेव । उदाहरणार्थं यदि वयं रुचिकरं भोजनम् अधिकमात्रेण सेवनं कुर्मः तर्हि उदरवेदनाम् अपचनञ्च अनुभवामः। निद्रा आवश्यकी परन्तु अधिका निद्रा आलस्यं वर्धयति । अतः यत् प्रमाणाधिकं तत् अवश्यं वर्जयेत् ।

# रामभद्राचार्यः

–सुधा भट कल्याणपूर , मङ्गलूरु



रामजन्मभूमि-आन्दोलनेन सह नैके जनाः सम्बद्धाः , नैके वादीरूपेण उपस्थिताः किन्तु नेत्रहीनस्य रामभद्राचार्यस्य साक्ष्यं निर्णायकं सम्भूय अयोध्यायां राममन्दिरस्य निर्माणं सुसाध्यं सञ्जातम् । शपथपत्रे सः वाल्मीकिरामायणात् तथा उपनिषद-वेद-पुराणेभ्यः नैकान् यथार्थसन्दर्भान् उद्धृत्य विपक्षमतानां खण्डनं कृत्वा अयोध्या श्रीरामस्य जन्मभूमिः इत्यस्य मतस्य पुष्टिं कृतवान् । दृष्टिहीनः सन् अपि तस्य ईदृशेन साक्ष्येण निर्णयं गृह्णन् न्यायाधीशः विस्मितः जातः।

संस्कृतभाषायां प्रकाण्डपण्डितः, २२ भाषासु विशारदः, कविः, तत्त्वज्ञः, लेखकः, सङ्गीतसंयोजकः, गायकः, नाटककारः, हरिकथावाचनप्रवीणः तथा नानाविधसाहित्यकलानिपुणः रामभद्राचार्यः पूर्णतया अन्धकः अस्ति। पूर्वाश्रमे शरयूनदीतीरवासिनः पण्डितरामदेवस्य तथा शचिदेवी मिश्रायाः सः गिरिधरः नाम पुत्रः।

द्विमासीयबालकः गिरिधरः दौर्भाग्यवशात् Trakoma नाम चक्षुरोगस्य सङ्क्रमणेन पीडितः जातः । १९५० तमे वर्षे अस्य रोगस्य समाधानकारकम् औषधं न विद्यमानम् आसीत् । परिणामतः गिरिधरः सम्पूर्णतया दृष्टिहीनः अभवत्।

"मनुष्यस्य इन्द्रियेषु नयनद्वयं प्रधानम्" इति एका उक्तिः अस्ति । परन्तु सृष्टिकर्ता रामभद्राचार्याय असामान्यां श्रवणस्मरणशक्तिं दत्तवान् यस्मात् केवलं श्रवणेन स्मरणेन च तस्य अध्ययनम् प्रारब्धम् । पितामहस्य मार्गदर्शनेन त्रिवर्षीय-बालकः सम्पूर्णभगवद्गीतां कण्ठस्थीकृतवान् । कः श्लोकः कस्मिन् अध्याये अस्ति एतदपि सः वक्तुं शक्नोति स्म ।

एकस्मिन् दिने गृहं प्रत्यागच्छन् गिरिधरः मार्गे एकस्मिन् गर्ते पतितवान् । तदा सः रामचरितमानसतः एकं श्लोकम् उच्चैः वक्तुं प्रारम्भं कृतवान् । किञ्चित् समयादनन्तरम् एका बालिका तत्र आगत्य तं रक्षितवती । मुदितः गिरिधरः गृहम् आगत्य यदा तस्य पितामहाय सर्वं

वृत्तान्तं कथितवान् तदा त्वया कृतरामगुणगानेन प्रसन्नः रामः एव तव प्राणरक्षणं कृतवान् इति सः उक्तवान् । अनेन प्रसङ्गेन प्रभावितः सप्तवर्षीय गिरिधरः पितामहस्य साहाय्येन केवलं ६० दिनेषु रामचरितमानसं कण्ठस्थीकृतवान् तथा १९५७ तमे वर्षे रामनवम्याम् इदं महाकाव्यं समुद्गीतवान् च।

गिरिधरस्य औपचारिकः विद्याभ्यासः कुण्ठितः किन्तु पितामहस्य मार्गदर्शनेन तस्य ज्ञानभाण्डारः वर्धमानः आसीत् । सप्तदशवर्षे सः संस्कृतपाठशालायां प्रवेशं प्राप्तवान् । तत्र अन्यभाषाः विषयान् च अधीत्य सः नैकानि सुवर्णपदकानि प्राप्तवान् ।

अनन्तरं वाराणसीस्थितात् पूर्णानन्दविश्वविद्यालयात् शास्त्रीपदवीं तथा स्नातकोत्तर-आचार्यपदवीं प्राप्य PhD अपि पूर्णं कृतवान् । तस्य पाण्डित्यम् अवलोक्य UGC समितेः सदस्याः स्वकार्यालये तस्य नियुक्तिम् इष्टवन्तः किन्तु ' " अहं धार्मिक-सामाजिक-आध्यात्मिककार्येषु एव निरतः भवामि " इति उक्त्वा सः तं प्रस्तावं निराकरोत् ।

अस्मिन् समये एव एकस्यां स्नातकोत्तर-स्पर्धायां घोषितेषु अष्टस्वर्णपदकेषु सः पञ्चस्वर्णपदकानि जितवान्। स्पर्धायां पञ्चस्वर्णपदकविजेता अन्धः अस्ति इति ज्ञात्वा तत्कालिन-प्रधानमन्त्री इन्दिरा गान्धी स्वीयधनेन तस्य विदेशे शस्त्रचिकित्सायाः आयोजनं कर्तुम् इष्टवती । तत्समये " अस्मिन् क्षुद्रजगति मम कृते श्रीरामात् ऋते अन्यः कोऽपि दर्शनीयः नास्ति । केवलं श्रीरामः मम मोक्षदायकः " इति उक्त्वा तं पर्यायं न स्वीकृतवान्।

१९८३ तमे वर्षे गिरिधरः संन्यासदीक्षां स्वीकृत्य रामभद्रदासः तथा रामभद्राचार्यः इति नाम्ना प्रसिद्धः अभवत् ।

अध्ययनार्थं वा साहित्यरचनार्थं वा सः कदापि ब्रेलभाषायाः उपयोगं न कृतवान्। संस्कृतभाषायां तथा हिन्दीभाषायां चत्वारि महाकाव्यानि , तुलसीदासस्य रामचरितमानस-काव्यस्य हिन्दीभाष्यम् , अष्टाध्यायी-प्रस्थानत्रय-ग्रन्थानां संस्कृतभाष्यं तथा शताधिकानि प्रबन्धानि पुस्तकानि च तेन रचितानि । रामायण-भागवतपुराणस्य सः उत्तमः कथाकारः इति विख्यातः। तस्य कृतीनां दृक्-श्राव्य-अभिलेखाः अपि प्रकाशिताः सन्ति ।

१९८७ तमे वर्षे रामभद्राचार्यः चित्रकूटे 'तुलसीपीठ' नाम्नीं धार्मिक-सामाजिकसेवासंस्थां स्थापितवान् । विकलाङ्ग- शिक्षासंस्थानम् , अन्धानां कृते तुलसीविद्यालयम् इत्यादीनाम् अपि स्थापनां कृतवान्।

२०१५ तमे वर्षे भारतशासनेन रामभद्राचार्यः पद्मविभूषणेन सम्मानितः । सद्यः एव ज्ञानपीठचयनसमित्या घोषितं यत् २०२३ तमस्य वर्षस्य ज्ञानपीठपुरस्कारस्य कृते रामभद्राचार्यः नियुक्तः जातः।

# परमनिधानम्

- वृन्दा चन्दावर , मुम्बई



अखिलविश्वस्य निधानं
परमगुरुपरिज्ञानाश्रमः ।
मनः मम अति-उच्छृङ्खलं
कथं करोमि तत् निश्चलम् ॥१॥

प्रथमदर्शने तु भासमानं
जीवनं कियत् अतिसरलम् ।
जीवनपरिक्रमणे तु ज्ञातम्
अस्ति तदतीव गहनम् ॥२॥

इदं जीवनयात्रा-गणितम्
अस्ति क्लिष्टं बहु कठिनम्।
भूमण्डले तस्य परिशोधकः
कोऽपि नान्यः विना गुरुम्॥३॥

सद्‌गुरु बोधामृतप्राशनेन
नश्यति घोरा भयभवभ्रान्तिः ।
तेषाम् अहर्निशं स्मरणेन
लभते जन्ममरणात् मुक्तिः ॥४॥

शरणे प्राप्नोमि चिरशान्तिम्
अतर्क्य-निर्मलसौख्यप्राप्तिः।
स्वामीपरिज्ञानचरणयुगले
भवतु सदा मम अचला प्रीतिः ॥५॥

# पक्षिमित्राः भवाम ।

**– शिल्पा मुद्रर, मुम्बई**



'अयि, शृणु ! भारद्वाजपक्षिणः स्वरः ।' सहसा मम हस्तं धृत्वा दीपा उक्तवती । 'कुप् कुप् कुप्  कुप् कुप् कुप्' इति विशिष्टा आहूः कर्णे पतिता । तस्याः प्रतिध्वनिः समन्तात् श्रूयमानः आसीत् । ननु विस्मयकारकः भारद्वाजस्य स्वरः ।

' भ्रमणार्थं गच्छाव ।' इति उक्त्वा अहं दीपां मया सह आनीतवती । निसर्गसौन्दर्यम् अवलोक्य, पवनस्पर्शम् अनुभूय, खगानां मधुरं कूजनं श्रुत्वा कस्य मनः न हृष्यति । अपि च पक्षिनिरीक्षणे मम विशेषा रुचिः । मया सह अटित्वा खगानां निरीक्षणे अभिज्ञाने च दीपायाः अपि रुचिः वर्धिता ।

'तत्र पश्य सखि, तस्मिन् वृक्षे उपविष्टः अस्ति सः ।'  इति उत्साहेन निर्दिष्टं दीपया । ' बाढम् , अहं नूतन-व्यवसायं प्राप्स्यामि !' सद्यः एव जातस्य साक्षात्कारस्य परिणामं प्रतीक्षमाणायाः तस्याः हर्षस्य कारणम् अवगतं मया । भारद्वाजखगस्य दर्शनं भारतीय-संस्कृत्यां शुभशकुनं मन्यते खलु ।

वयं सुदामाकृष्णयोः कथां जानीमः । यदा सुदामा स्वमित्रेण कृष्णेन मेलितुं द्वारकां गतः, तदा तस्य पुरतः भारद्वाजपक्षी मार्गं तरितवान् इति महाभारते उल्लेखः अस्ति । तदनन्तरं कृष्णदर्शनात् तस्य भाग्यमेव परिवर्तितम् । कृष्णेन मुष्टिमिते पृथुके खादिते सुदाम्नः गृहं धनधान्यसम्पन्नम् अभवत् । तस्मिन् काले अपि भारद्वाजखगस्य दर्शनं कल्याणकरं मन्यते स्म इति कथनस्य विषयः अत्र ।

मम गृहात् बहिः तु भारद्वाजः प्रतिदिनं दृश्यते । श्रीकृष्णस्य दर्शनमेव दुर्लभं भो !

'ग्रेटर कौकल' इति आङ्ग्लनामकः अयं भारद्वाजपक्षी, दक्षिणभारते रत्नपक्षी नाम्ना अपि ज्ञायते । वैज्ञानिक-नाम सेंट्रोपस साईनेसिस (Centropus sinesis) इति । वनेषु, तृणप्रदेशेषु, उत्तुङ्गपर्वतेषु तथैव मानवानां समीपे नगरेषु अपि अस्य अधिवासः । सम्पूर्णे भारतदेशे तथा च आशियाखण्डस्य दक्षिणपूर्वभागे प्राप्यते एषः खगः ।

लज्जालुः सः प्रायः निबिडे लघुवृक्षे दृश्यते । क्षितिजन्तवः, कीटाः, सरटाः, लघु-मण्डूकाः, सर्पशिशवः च भारद्वाजखगस्य आहारः । सः बृहत्कायः खगः अतः वनकाकः इव भाति, किन्तु तस्य गणना कोकिलकुले भवति । रक्तनेत्रकोशः कुकु-कुटुम्बस्य लक्षणम् । तस्य शरीरं कृष्णनीलं तस्य पक्षौ च मृत्तिकारक्तौ । दीर्घं कृष्णनीलं च तस्य पुच्छम् । स्त्रीपक्षिणी नरपक्षी च समानवर्णीयौ । यद्यपि भारद्वाजः कुकु-कुलस्य सदस्यः तथापि अण्डानि अन्येषां नीडे न स्थापयति । नरपक्षी नीडं रचयति तथा उभौ मिलित्वा शावकानां पालनं कुरुतः ।

भारद्वाजस्य स्वरः अवधानेन श्रूयते चेत् तस्मिन् विविधता ज्ञायते । सङ्कटकाले 'हिस्स' इति स्वरः, क्रोधेन 'स्कियौ' इति, कदाचित् 'लोटॉक, लोटॉक' इत्यपि वदति सः । शान्त-वातावरणे यदा एकः भारद्वाजखगः 'कुप् कुप् कुप्' इति शब्दम् उच्चरति, तदनु अन्यः अपि 'कुप् कुप् कुप्' वदति । एवं ५ - १० वारं तयोः संवादः प्रवर्तते । परिसरे प्रतिनादितः एषः स्वरः विमोहयति आदरं च जनयति ।

ईदृशः स्वरः भवता श्रूयेत चेत् विना विलम्बं भारद्वाजस्य अन्वेषणं करोतु । को जानाति ? तस्य रत्नपक्षिणः दर्शनं भवतः भाग्योदयाय स्यात् ।

बालरञ्जनी

# लीला हनुमतः

-डॉ. प्रभुराज गिणिमाव , लण्डन्

एकदा हनुमान् तस्य माता अञ्जनी च अतिमधुरं वीणावादनं रामकीर्तनं च श्रुतवन्तौ ।

हनुमान् – मातः ! किं शृणोषि वा त्वमपि सुमधुरस्वरान् ! अस्ति वा तत्र कोऽपि ?

माता – आम् ! वत्स अहम् अपि रामकीर्तनं वीणावादनञ्च शृणोमि । प्रायः नारदमुनिवर्यः आगमिष्यति खलु ।

हनुमान् – नारदमुनिवर्यः? सः कः मातः?

माता – सः महान् मुनिवर्यः अस्ति । तस्य परिचयः न आवश्यकः । त्वमेव गच्छ, सः त्वां परिजानाति।

हनुमान् – ओहो ! एवं वा? ( हर्षेण उत्प्लुत्य ) तर्हि अधुनैव अहं तं महान्तं पुरुषं मेलितुं गच्छामि।

माता – हे वत्स, मन्दं गच्छ। मुनिवर्यं प्रणम्य तस्य आशीर्वादं स्वीकुरु।

हनुमान् – अस्तु मातः।

हनुमान् – प्रणामाः मुनिवर्य। भवान् महान् पुरुषः अस्ति इति मम माता उक्तवती । अतः भवान् कृपया मह्यम् आशीर्वादं ददातु। भवान् यदि आशीर्वादं न ददाति तर्हि इतः अग्रे गन्तुं न शक्नोति।

नारदः – हे हनुमन् ! कम् आशीर्वादम् इच्छसि?

हनुमान् – पूर्वम् इन्द्रादिदेवताः बहून् आशीर्वादान् दत्तवन्तः।अहं कमपि अन्यम् आशीर्वादं न स्मरामि , अतः भवान् एव चिन्तयित्वा आशीर्वादं ददातु ।



दया बाळे कोप्पिकर , न्यू जर्सी

नारदः – हूम् .... हनुमन् , तव समीपे किम् नास्ति? त्वं सङ्गीतकलायां महान् विद्वान् भवतु इति आशीर्वादं ददामि। सन्तुष्टः वा? अधुना अहं गच्छामि | त्वं रोधनं मा कुरु।

हनुमान् – तिष्ठतु भवान् , निमिषमात्रं तिष्ठतु। भवान् सङ्गीते श्रेष्ठः अस्ति इति मम माता उक्तवती। अहं सङ्गीतकलायां भवतः अपेक्षया श्रेष्ठः भवितुम् इच्छामि । अतः मह्यं तादृशम् आशीर्वादं ददातु ।

नारदः – तथास्तु, त्वं सङ्गीते मम अपेक्षया निपुणः भव।

हनुमान् – भवतः अपेक्षया अहं वरिष्ठः सञ्जातः इति कथं ज्ञातव्यम् ?

नारदः – समीचीनम् ।अहम् अत्र एव उपविशामि । तव गीतं शृणोमि । मम वीणाम् एतस्यां शिलायां स्थापयामि।अधुना गानस्य आरम्भं कुरु ।

हनुमान् – गायानि वा?

नारदः – अवश्यं गाय। ( मुनिः वीणां शिलायां स्थापयति भूमौ उपविशति च)

हनुमान् यं रागं चितवान् सः रागः शिलां विद्रावितवान् । हनुमान् अतीव मधुरतया गीतं गीतवान् । शिला शनैः शनैः द्रवितवती । तस्याः उपरि स्थापिता वीणा अपि शिलायां लीना भवितुम् आरब्धवती । वीणा शिलायां तरणम् उपाक्रामत् ।

नारदमुनिः तस्य नेत्रे निमील्य गायने रतः आसीत् ।

नारदः – साधु साधु ! अति उत्तमं गायनम् , अद्भुतं गायनं , त्वं निश्चयेन श्रेष्ठतमः गायकः । अधुना त्वं गायनात् विरम ।

हनुमान् – हे मुनिवर्य , नेत्रे उन्मील्य वदतु यदि अहं गायनं स्थगयानि वा ?

मुनिः – ( नेत्रे उन्मीलति , वीणां शिलायां न पश्यति । ) आम् । अधुना गायनं समाप्तं कुरु ।

( तदा हनुमान् गायनं स्थगितवान्। तत्क्षणे शिला कठिणा जाता । ततः वीणा शिलायां संसक्ता अभवत्।

नारदः – अधुना अहं गमिष्यामि मम वीणां गृह्णामि च । अहो , वीणा न सरति । शिलायां संसक्ता अस्ति । हनुमन् , त्वं किं कृतवान् ?

हनुमान् – अहं केवलं गीतम् अभिगीतवान् , तावद् एव। भवान् एव मह्यम् आशीर्वादं दत्तवान् । भवान् एव गातुम् उक्तवान् । अधुना भवान् एव आक्षेपं करोति किम् ?

नारदः – यत् किमपि भवतु। त्वं पुनः एकवारं तमेव रागं गाय, येन अहं मम वीणां स्वीकर्तुं शक्नोमि ।

हनुमान् – अधुना अहं न गायामि ।

नारदः – कृपया पुनः गाय भोः !

( हनुमान् उत्प्लवनम् आरब्धवान् प्रासादे सर्वत्र धावितवान् च । सः इतस्ततः कोष्ठात् कोष्ठं धावितवान् । नारदमुनिः तम् अनुधावितवान् । तदैव माता अञ्जनी तत्र आगतवती नारदं हनुमन्तम् अनुसरन्तं दृष्टवती च। सा नारदं प्रणतवती । )

माता – हे मुनिवर्य मम पुत्रः किं कृतवान् , पीडां दत्तवान् वा ?

नारदः – न न अयि ! सः मम वीणां शिलायां संसक्तां कृतवान्।

माता – अहो पुनरपि सः चेष्टाम् आरब्धवान् वा ? हे वत्स, मुनिवर्यस्य वीणां शिलातः उत्पाट्य यच्छ ।

हनुमान् – हे मातः , मुनिवर्यः अस्माकं प्रासादस्य सर्वान् कोष्ठान् तस्य पादस्पर्शेन पावनं करोतु इति अहम् अपेक्षितवान् । अतः अहम् एवं कृतवान् । अधुना सर्वत्र मुनिवर्यस्य पादस्पर्शः अभवत् , अतः अहं मुनिवर्यस्य वीणां ददामि।

नारदः – हनुमन् , त्वं पूर्वम् एव अनुग्रहीतः असि । त्वं श्रीरामस्य सर्वकालं विनम्रसेवकः अपि असि ।

तत्पश्चात् हनुमान् गीतं गायन् वीणां नारदाय दत्तवान् । नारदमुनिः अपि ततः नारायण नारायणेति सङ्कीर्त्य गतवान् च ।


## बालरञ्जनी

### वाद्यपरिचयः

**अधोदत्ते कोष्ठेके दशवाद्यानां नामानि अन्विष्य चित्रसमीपे लिखतु –**



१



२



३



१०



४



९

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| मे | ज | आ | धी | ण्टा | घ | कृ | ति | स्मि | र |
| झ | ल्ल | क | म् | न्म | ए | ता | घ | हा | आं |
| न्म | म | को | रुः | ब | ना | म् | ल | ह | का |
| स्मि | स्म | धी | म | स्य | धी | वा | पि | श | द्धि |
| आं | न्म | द्धि | ड | सी | भे | न् | स्मि | ता | स्व |
| श | ङ्खः | को | श | वी | क | सु | स्य | त | ङ्गः |
| स्रो | सी | प्त | स्रो | ए | क्का | भा | णुः | वे | द |
| त | कृ | वी | त्र्या | ध | ढ | न् | वी | ता | मृ |
| श | त | त | न्त्री | ल्य | ण | ए | धी | ढ | ज |
| वी | न्म | ठ्यं | द्धि | न्म | प | मृ | त | वी | णा |

- विभा कैलाजे, मुम्बई



५



८



७



६

उत्तराणि अन्तिम-पृष्ठे दत्तानि

## रुचिरा

## व्याघरणमरिचम् (फोडणीमिरची)

- मीना गङ्गोळी ( मुम्बई )





### साहित्यम् –

१) महत्हरितमरिचानि - १/२ किलो परिमितम्
२) खाद्यतैलम् - चमसद्वयपरिमितम्
३) कृष्णसर्षपाः -१/४(tsp) चमसपरिमितम्
४) हिङ्गुः - १/४ चमसपरिमितम्
५) मेथिकाबीजानि - १/४ चमसपरिमितम्
६) तिलाः - २ चमसपरिमितम्
७) हरिद्राचूर्णम् - १/२ चमसपरिमितम्
८) हरितमरिचानि - २/३

**उपस्कराः (मसाला) -**

१) मेथिकाबीजानि - १/४ चमसपरिमितम्
२) कृष्णसर्षपाः - १/४ चमसपरिमितम्
३) तिलाः - ६ चमसपरिमितम्
४) कृष्णमरिचानि (black pepper)- १५ - १६
५) तैलम् - १/२ चमसपरिमितम्
६) निम्बूकः- १/२
७) लवणम् - स्वादानुसारम्

### कृतिः –

- महत्हरितमरिचानि सम्यक् प्रक्षाल्य अन्तस्थितबीजानि तथा तन्तून् निष्कास्य लम्बरेखायां कर्तयतु ।
- पात्रे चमसद्वयपरिमितं खाद्यतैलम् उष्णं करोतु। तैले १/४ चमसपरिमितान् सर्षपान् , १/४ चमसपरिमितानि मेथिकाबीजानि, १/४ चमसपरिमितं हिङ्गुं , चमसद्वयपरिमितान् तिलान्, १/४ चमसपरिमितं हरिद्राचूर्णं योजयतु । यदा व्याघरणं सिद्धं भवति तदा त्रीणि- चत्वारि हरितमरिचानि ( विनाकर्तनं ) , शाकस्य खण्डानि च योजयतु । शाकं पक्तुं पात्रस्य उपरि आच्छादनं स्थापयतु । (जलं मा योजयतु।) यावत् मरिचानां वर्णः परिवर्तितः न भवति तावत् पर्यन्तं शाकं मन्दज्वालायां पचतु । तदनन्तरम् इदं पात्रं पार्श्वे स्थापयतु ।
- उपस्करं (मसाला)सिद्धं कर्तुम् -
- पात्रे १/२ चमसपरिमितं तैलम् उष्णं करोतु । उष्णतैले १/४ चमसपरिमितान् सर्षपान् (कृष्ण), १५/१६ कृष्णमरिचानि , १/४ चमसपरिमितानि मेथिकाबीजानि तथा ६ चमसपरिमितान् तिलान् स्थापयतु किञ्चित् भर्जयतु (roast) च । तदनन्तरं भर्जितपदार्थान् चूर्णीकरोतु । स्वादानुसारं लवणं योजयतु ।
- शाके चूर्णीकृतपदार्थान् योजयित्वा सम्यक् आलोडयतु। शाकं शीतलं कृत्वा निम्बूरसं योजयित्वा पुनः सम्यक् आलोडयतु ।
- परिवेषणाय अस्माकं रुचिकरं व्याघरणमरिचम् (फोडणीमिरची) सिद्धं भवति।



# तस्मै पाणिनये नमः

**- शुभदा वकनळ्ळी, टोरोन्टो**
**- शीला कळावर , ठाणे**

इत्-संज्ञा इति विषयः प्रवर्तमानः अस्ति । इत्-संज्ञाविधायकसूत्राणाम् आवल्यां क्रमेण तृतीयं सूत्रम् अस्ति :-

**न विभक्तौ तुस्माः । (१.३.४)**

विभक्तिः नाम का ?

नामपदनिर्माणसमये ये प्रत्यया: मूलशब्दात् (प्रातिपदिकम्) विधीयन्ते ते सुँप् प्रत्ययाः भवन्ति । उदा. राम + सुँ = रामः । अत्र सुँ इति सुँप् प्रत्ययः । क्रियापदनिर्माणसमये ये प्रत्ययाः मूलधातुतः विधीयन्ते ते तिङ् प्रत्ययाः इति उच्यन्ते । उदा. भू + शप् + तिप् = भवति । अत्र तिप् इति तिङ् प्रत्ययः । एते सुप् तिङ् च प्रत्ययाः 'विभक्तिः' इति संज्ञां प्राप्नुवन्ति । सुप् तिङ् प्रत्ययाः विभक्तिसंज्ञकाः भवन्ति ।

**सूत्रार्थः -** विभक्तिसंज्ञकप्रत्ययानाम् अन्तिमवर्णस्य हलन्त्यम् (१.३.३) इति सूत्रेण इत् संज्ञा भवितुम् अर्हति । किन्तु न विभक्तौ तुस्माः (१.३.४) इति सूत्रेण सर्वेषां विभक्तिसंज्ञकप्रत्ययानाम् अन्ते विद्यमानाः तवर्गीयवर्णाः (त्, थ्, द्, ध्, न्), सकारः तथा मकारः इत्येतेषां इत्-संज्ञा न भवति । अतः न विभक्तौ तुस्माः (१.३.४) इति निषेधकसूत्रम् इति उच्यते ।

**उदाहरणार्थम् –**

१. सकारान्त-प्रत्ययाः – जस् , शस् , भिस् , भ्यस् , ङस् , ओस् (सुँप् प्रत्ययाः ), तस् थस् वस् मस् (तिङ् प्रत्ययाः ) ।

२. मकारान्त-प्रत्ययाः – अम् , भ्याम् , आम् (सुँप् प्रत्ययाः) , तम् ताम् अम् (तिङ् प्रत्ययाः) ।

३. त-वर्गान्त-प्रत्ययाः – आत् रन् स्मात् स्मिन्

उपर्युक्तानां प्रत्ययानाम् अन्तिमस्य हल्-वर्णस्य हलन्त्यम् (१.३.३) इति सूत्रेण प्राप्ता इत् संज्ञा न विभक्तौ तुस्माः (१.३.४) इति सूत्रेण निषिध्यते ।

**अभ्यासः** **कोष्ठके लिखितेषु विभक्तिसंज्ञकप्रत्ययेषु कस्य वर्णस्य इत् संज्ञा न भवति? प्रथमम् उदाहरणं दृष्ट्वा विचिन्त्य उत्तराणि योजयत ।**

| विभक्तिसंज्ञकप्रत्ययाः | कस्य अन्तिमवर्णस्य इत् संज्ञा न भवति ? | इत्-संज्ञा निषेधक सूत्रम् | प्रयोगः |
|---|---|---|---|
| शस् | स् | न विभक्तौ तुस्माः (१.३.४). | राम + शस् = रामान् |
| जस् | | | राम + जस् = रामाः |
| भिस् → ऐस् | | . | राम + ऐस् → रामैः |
| ङस् | | . | जगत् + ङस् → जगतः |
| ओस् | | | राम + ओस् → रामयोः |
| अम् | म् | . | राम + अम् → रामम् |
| भ्याम् | | . | राम + भ्याम् → रामाभ्याम् |
| आम् | | | राम + आम् → रामाणाम् |
| तम् / ताम् | | | वद् + तम् / ताम् → वदतम् / वदताम् |
| ङसिँ → आत् | त् | | राम + ङस् → राम + आत् → रामात् |
| झ → रन् | न् | | सेव् + झ → सेव् + रन् → सेवेरन् |
| ङसिँ → स्मात् | | . | सर्व + ङसि → सर्व + स्मात् → सर्वस्मात् |
| ङि स्मिन् | | | सर्व + ङि → सर्व + स्मिन् → सर्वस्मिन् |

उत्तराणि अन्तिमपृष्ठे दत्तानि ।

## हास्यकणिका

**-जयश्री चन्दावरकर , मुम्बई**

एकदा एकः मन्त्रीमहोदयः कार्यार्थं पुण्यनगरीं गतवान्। तदा येरवडा-ग्रामतः मनोरुग्णनिवासस्य सञ्चालकः निवासस्य प्रबन्धपरीक्षणार्थं तम् आमन्त्रितवान् ।

सञ्चालकः तम् अवदत् ," अत्र सुव्यवस्थितरीत्या सर्वं कार्यं चलदस्ति । सर्वे रुग्णाः शनैः शनैः स्वास्थ्यं प्राप्य आनन्देन स्वगृहं गच्छन्ति । "

तत्र मनोहरः नाम एकः सदस्यः रुग्णालयस्य प्रार्थनाभवनं , पुस्तकालयं , क्रीडाक्षेत्रं, व्यायामशालां , भोजनशालाम् , अन्याः कक्षाः अपि दर्शितवान् ।

सन्तुष्टः मन्त्रीमहोदयः पुनरागमनसमये स्वकारयाने उपविश्य मनोहरं पृष्टवान् ,



" त्वं जानासि वा अहं कः ? "

मनोहरः अवदत् ," महोदय , क्षमस्व। अहं न जानामि। "

मन्त्रीमहोदयः उक्तवान् , " अहं मन्त्री अस्मि।"

मनोहरः अवदत् , " अत्र आगमनात् पूर्वम् अहम् अपि एतदेव कण्ठशोषेण सर्वान् वदामि स्म । किन्तु मम प्रियबान्धवाः मम किमपि न श्रुत्वा माम् अत्र त्यक्त्वा गृहं प्रत्यगच्छन्। अतः एवं मा वदतु।"

# एकः अविस्मरणीयः प्रसङ्गः

**-साधना काय्किणि, बेङ्गलूरु**

१९८२ तमे वर्षे मम विवाहः एकस्मिन् स्नेहमये कुटुम्बे अभवत् । तेषां बान्धवेषु एकेन कुटुम्बेन सह निकटतमः भावः मया अचिरात् अनुभूतः।

मम श्वश्रोः बन्धुः वसन्तः तस्य पत्नी हेमलता तथा पुत्रद्वयं विजयः सञ्जयः च मयि स्निह्यन्ति स्म । पुत्रद्वयमपि जन्मना मन्दबुद्धिः- अतः व्यवहारेण बालसदृशम् । परन्तु तेषां गृहे शोकस्य लेशः अपि नासीत् । सर्वत्र आनन्दलहर्याः स्निग्धता एव प्रसृता आसीत् ।

कालस्य प्रवाहः तु चलति एव ! कस्यापि कारणेन कुटुम्बः मुम्बईनगरतः बेङ्गळूरुनगरम् आगत्य अत्रैव उषितवान् । २०२० तमे वर्षे पत्न्याः देहान्तात् अनन्तरं पुरुषत्रयेण भिन्नभिन्नस्थानं प्राप्तम्। जनकः वृद्धाश्रमे ज्येष्ठः पुत्रः एकस्यां संस्थायां कनिष्ठः पुत्रः अन्येकस्यां संस्थायां च उषितवन्तः। मम वासः तु बेङ्गळूरु-नगर्यामेव आसीत् । अतः अहं तेषां पालनस्य उत्तरदायित्वं स्वीकृतवती ।

एतस्मिन् वर्षे फरवरीमासे अकस्मात् ज्येष्ठपुत्रः विजयः बहु अस्वस्थः अभवत् । अतः रुग्णालये सः स्थापितः अस्माभिः। द्विनवतिवर्षीयः वसन्तमातुलः पुत्रं द्रष्टुं यदा कदा गच्छति स्म । परन्तु अहो दुर्भाग्यम् ! मार्चमासस्य षष्ठम-दिनाङ्के रात्रौ रुग्णालये एषः पुत्रः दिवङ्गतः । अधुना क्लिष्टकार्यं यत् जनकं मया कथं सूचनीयम् इति ।

प्रातः पञ्चवादने अहं वसन्तमातुलस्य वृद्धाश्रमं प्राप्तवती। मातुलः वेङ्कटेश- सुप्रभातस्तोत्रं शृण्वन् आसीत्। मां दृष्ट्वा आनन्देन उत्थितवान् ! तूष्णीं तस्य समीपम् उपविश्य मम हस्ते तस्य हस्तं धृतवती। सः मां पृष्टवान् -" कोऽपि समाचारः अस्ति वा? कदा आवाभ्यां रुग्णालयं गमनीयम्?"

मया उक्तम् ," अधुना तस्य आवश्यकता नास्ति , मातुल! " पुनः आवयोः मध्ये मौनम् ! किञ्चित् क्षणानन्तरं मन्दस्वरेण मातुलः पृष्टवान् " दुःखमय-समाचारः अस्ति वा? " इति।

तस्मिन् क्षणे देवस्य कृपया एव मनसि एकः उपायः आगच्छत् ! मया उक्तं " भयवेदनाभ्यां मुक्तिः दुःखमय-समाचारः अस्ति क्व? " धैर्यं गृहीत्वा मम मातुलः उक्तवान् -" न ! एषः दुःखमय-समाचारः कदापि न ! अस्तु । वद । कदा गतवान् सः?" अनन्तरं मातुलस्य नेत्राभ्यां पुत्रवियोगात् अश्रुधारा प्रवाहिता । परन्तु कनिष्ठ-पुत्रं सञ्जयं स्मृत्वा कथञ्चित् हसितवान् सः। अधुना देवस्य नामस्मरणं कुर्वन् स्वजीवनं यापयन् अस्ति । धैर्यशीलमातुलाय मम साष्टाङ्ग-प्रणामाः।

# कैवल्योपनिषदि केचन श्लोकाः

**-कृष्णानन्द मङ्कीकर, मुम्बई**

पूर्वस्मिन् संस्करणे अस्माभिः अवस्थात्रयस्य व्याप्तिः दृष्टा । इदानीं पञ्चदशं श्लोकं पश्यामः –

**एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।**

**खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥१५॥**

"एतस्मात्" इति परब्रह्मणः नामधेयम् । "एतत्" (१) जीवात्मनः प्राणकारणं, मनसः कारणं तथा च सर्वाणामिन्द्रियाणामपि कारणम् । तथा च (२) यानि पञ्चमहाभूतानि सन्ति तेषामपि "एतत्" कारणम् । तदुपरि (३) यदिदं सर्वं विश्वं तस्यापि "एतदेव" कारणम् । अत्र (१) अस्मिन् उक्ताः विषयाः "व्यष्टि" अर्थात् व्यक्तिस्वरूपाः उच्यन्ते । (२ तथा ३) एतौ "समष्टि" इति व्याख्यायेते । एतेषां सर्वेषां "एतत्" कारणं "महाकारणम्" अथवा "जगत्कारणम्" इति ज्ञातम् ।

कोऽपि परिणामः कारणाद्विना न जायते, किमपि कार्यं च कारणाद्विना न जायते । यथा घटस्य कारणं मृत्तिका (उपादान कारणम्) तथा कुलालः (कुम्भकारः) निमित्तकारणमित्यादि । तथा च सृष्टिः कथम् अभवत् , कथं जीवः भवति इत्यादयः विषयाः अतीव गहनाः तथा भगवत्पादैः शङ्कराचार्यैः एतेषां विषयाणाम् ऊहापोहः तेषां व्याख्यासु विशदीकृतः अस्ति ।

अस्मिन्श्लोके उक्तं यत् , "एतस्मात्" पञ्च प्राणाः, पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, मनः (इति अन्तःकरणम्) (अन्तःकरणम् इति मनः बुद्धिः चित्तं तथा अहङ्कारः इत्येषां समुच्चयः) एतानि सर्वाणि तत्त्वानि जातानि ।

अस्य श्लोकस्य अपरे पादे पञ्च महाभूतानि ( १. खम् – आकाशः, २. वायुः, ३. ज्योतिः - तेजस्, ४. आपः इति जलं तथा ५. पृथिवी) अपि "एतस्मात्" जातानि इति प्रोक्तम् । इत्यत्र "पृथिवी विश्वस्य धारिणी" इदं विशेषरूपेण मन्तव्यं यत् , मातृरूपा इयं सर्वेषां "धारणम्" भरणं पोषणं वा करोति इत्यर्थः ।

एतस्मिन् श्लोके प्रथमे पादे "व्यष्टि" (यत् आङ्ग्लभाषायां microcosm इति ज्ञातम् ) तथा द्वितीये पादे "समष्टि" (macrocosm) इत्येतयोः विचारः प्रतिपादितः ।

जगत् कथं भूतं समष्टिरूपेण तथा च व्यष्टिरूपेण इत्ययं विशिष्टः विषयः आचार्यैः "पञ्चीकरणम्" इति नामाभिधानेन अन्यत्र विशदीकृतः अस्ति, तत् जिज्ञासुभिः द्रष्टव्यम् , अभ्यासितव्यं तथा मन्तव्यञ्च ।

इत्यलमिदानीम् । पुनर्मिलामः ।

शुभं भवतु ।

## योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर, ठाणे**

**अनुवादः – वैशाली कोप्पीकर, बेङ्गलूरु**

### द्रोणासनम् ।

इदम् आसनं वयम् उपविश्य अथवा भूमौ पृष्ठं समतलं संस्थाप्य अपि कर्तुं शक्नुमः।

**कृतिः -**

भूमौ कटं प्रसार्य तस्मिन् ऊर्ध्वमुखं शयनीयम् । पादद्वयमपि एकत्र आनीय पृष्ठवंशं ग्रीवां च सरले स्थापनीये । हस्तद्वयमपि शरीरमुभयतः समतलं स्थापनीयम् । समानसमय एव हस्तद्वयं , पादौ , पृष्ठवंशं च उन्नीय चित्रानुसारं तस्यामेव स्थितौ स्थिरं भवितव्यम् । पृष्ठवंशम् उन्नेतुम् अशक्यं चेत् ग्रीवां भुजौ च उन्नीयन्ताम् ।



ध्रुव बल्जेकर , मुम्बई

**लाभाः -**

एतेन आसनेन प्रधानलाभः अयं यत् उदरस्य स्नायवः, हस्तपादयोः स्नायवः च बलिष्ठाः भवन्ति । पचनक्रिया अपि सुलभतया भवति। उदरस्य वसां (मेदः) न्यूनीकर्तुं साहाय्यं भवति ।

**वर्ज्यम् -**

यः ग्रीवाविकारपीडितः भवति तेन एतत् आसनं त्याज्यम् । अथवा वैद्यस्य सूचनानुसारम् आसनमिदं करणीयम् ।

## उत्तराणि

**वाद्यपरिचयः**

१. वीणा
२. वेणुः
३. मृदङ्गः
४. काहलम्
५. घण्टा
६. झल्लकम्
७. ढक्का
८. शततन्त्री
९. शङ्खः
१०. डमरुः

## तस्मै पाणिनये नमः अभ्यासः

| विभक्तिसंज्ञकप्रत्ययाः | कस्य अन्तिमवर्णस्य इत् संज्ञा न भवति ? | इत्-संज्ञा निषेधक सूत्रम् | प्रयोगः |
|---|---|---|---|
| शस् | स् | न विभक्तौ तुस्माः (१.३.४). | राम + शस् = रामान् |
| जस् | स् | न विभक्तौ तुस्माः (१.३.४). | राम + जस् = रामाः |
| भिस् → ऐस् | स् | न विभक्तौ तुस्माः (१.३.४). | राम + ऐस् → रामैः |
| ङस् | स् | न विभक्तौ तुस्माः (१.३.४). | जगत् + ङस् → जगतः |
| ओस् | स् | न विभक्तौ तुस्माः (१.३.४). | राम + ओस् → रामयोः |
| अम् | म् | न विभक्तौ तुस्माः (१.३.४). | राम + अम् → रामम् |
| भ्याम् | म् | न विभक्तौ तुस्माः (१.३.४). | राम + भ्याम् → रामाभ्याम् |
| आम् | म् | न विभक्तौ तुस्माः (१.३.४). | राम + आम् → रामाणाम् |
| तम् / ताम् | म् | न विभक्तौ तुस्माः (१.३.४). | वद् + तम् / ताम् → वदतम् / वदताम् |
| ङसिँ → आत् | त् | न विभक्तौ तुस्माः (१.३.४). | राम + ङस् → राम + आत् → रामात् |
| झ → रन् | न् | न विभक्तौ तुस्माः (१.३.४). | सेव् + झ → सेव् + रन् → सेवेरन् |
| ङसिँ → स्मात् | त् | न विभक्तौ तुस्माः (१.३.४). | सर्व + ङसि → सर्व + स्मात् → सर्वस्मात् |
| ङि → स्मिन् | न् | न विभक्तौ तुस्माः (१.३.४). | सर्व + ङि → सर्व + स्मिन् → सर्वस्मिन् |

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर **मुखपृष्ठछायाचित्रम् –** वैष्णवी बळवळ्ळी

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति । पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code for Enquiry Form